സമഗ്ര ചോദ്യോത്തരങ്ങൾ

Chapter Name:**कुशलिनः सन्तु सर्वदा ।** *Marks :(4)*

Quest:

**प्रश्नपाठः** यथोचितं योजयत।

| | |
|---|---|
| 1.आपन्निवारणम्। | 1.ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते<br>सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते।। |
| 2.आयासनिवारणम्। | 2.क्लैब्यं मा स्म गमः पार्थ ! नैतत्वय्युपपद्यते।<br>क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप! ।। |
| | 3.देवान् भावयतानेन ते देवा भावयन्तु वः।<br>परस्परं भावयन्त श्रेयः परमवाप्स्यथ।। |

Hint:

मूल्यनिर्णयसूचकम् -

उचितयोजनम्।

Chapter Name:**कुशलिनः सन्तु सर्वदा ।** *Marks :(4)*

Quest:

**प्रश्नपाठः -** श्लोकस्य गद्यक्रमं पूरयत।

क्रोधात् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः।

स्मृतिभ्रंशात् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति।।

गद्यक्रमः- क्रोधात् ......... भवति सम्मोहात् ............. स्मृतिभ्रंशात् ............
बुद्धिनाशात्........।

Hint:

**मूल्यनिर्णयसूचकम्।**

उचितरीत्या गद्यक्रमलेखनम्।

Chapter Name:**कुशलिनः सन्तु सर्वदा ।** *Marks :(1)*

Quest:

**प्रश्नपाठः** - अशुद्धं वाक्यं चित्वा लिखत।

1. क्रोधात् सम्मोहः भवति।

2. भारतीयदर्शनपद्धतिषु प्रमुखं स्थानमर्हति श्रीमद् भगवद्गीता।

3. आत्मनः बन्धुः शरीरम् भवन्ति।

Hint:

उत्तरसूचकम् - आत्मनः बन्धुः शरीरम् भवन्ति।

Chapter Name:**कुशलिनः सन्तु सर्वदा ।** *Marks :(1)*

Quest:

**प्रश्नपाठः** - कः गणे न अन्तर्भवति ?

1. कर्णभारम्, महाभारतम्, अभिज्ञानशाकुन्तलम्।

Hint:

उत्तरसूचकम् - महाभारतम्

**Chapter Name:कुशलिनः सन्तु सर्वदा ।** *Marks :(4)*

**Quest:**

**प्रश्नपाठः** - कोष्ठकात् उचितपदानि स्वीकृत्य रिक्तस्थानानि पूरयत।

(पार्थ, क्लैब्यं, परन्तप, हृदयदौर्बल्यं)

............ मा स्म गम .............. नैतत्वय्युपपद्यते। क्षुद्रं ............ त्यक्त्तोतिष्ठ ..........।।

**Hint:**

उत्तरसूचकम् -

1.क्लैब्यं।

2.पार्थ ।

3.हृदयदौर्बल्यं।

4 परन्तप ।

**Chapter Name:कुशलिनः सन्तु सर्वदा ।** *Marks :(2)*

**Quest:**

**प्रश्नपाठः** - पदच्छेदं कुरुत।

आत्मैव - ........ +...........।

ह्यात्मनः - ......+ .............।

**Hint:**

मूल्यनिर्णयसूचके-

आत्मा+ एव,

हि +आत्मानः।

**Chapter Name:कुशलिनः सन्तु सर्वदा ।** *Marks :(4)*

**Quest:**

**प्रश्नपाठः** - रेखाङ्कितपदानां स्थाने कोष्ठकात् समानार्थकपदानि उपयुज्य गद्यांशं पुनर्लिखत।

(मूढता, कोपात्, विनश्यति, विवेकनाशः)

क्रोधात् सम्मोहः भवति। सम्मोहात् स्मृतिविभ्रमः , स्मृतिभ्रंशात् बुद्धिनाशः ,बुद्धिनाशात् प्रणश्यति। ।

**Hint:**

मूल्यनिर्णयसूचकानि -

क्रोधात् - कोपात्।

सम्मोहः - मूढता।

बुद्धिनाशः - विवेकनाशः।

प्रणश्यति - विनश्यति।

**Chapter Name:कुशलिनः सन्तु सर्वदा ।** *Marks :(2)*

**Quest:**

**प्रश्नपाठः** - क विभागे दत्तम् आशयं पठित्वा तदाशयप्रतिपादकं श्लोकं ख विभागात् चित्वा लिखत।

क

- एवं परस्परसम्पद्विनिमयेन श्रेयसः परमाम् अवस्थां प्राप्नुवन्ति।

ख

- क्रोधात् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः ।

  स्मृतिविभ्रंशात् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति॥

- देवान् भावयतानेन ते देवा भावयन्तु वः।

  परस्परं भावयन्तः श्रेयः परमवाप्स्यथ।।

**Hint:**

मूल्यनिर्णयसूचकम्- उचितश्लोकचयनम्।

**Chapter Name:कुशलिनः सन्तु सर्वदा ।** *Marks :(4)*

**Quest:**

**प्रश्नपाठः** - कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।

1. भगवद्गीता कस्मात् ग्रन्थात् उद्धृता?

(रामायणात्, महाभारतात्, पुराणात्)

2. महाभारतस्य कर्ता कः?

(कालिदासः, व्यासः, वाल्मीकिः)

3. पार्थः कः?

(अर्जुनः, कर्णः, कृष्णः)

4. हे परन्तप! “क्षुद्रं हृदयदौर्बल्यं त्यक्त्वा उत्तिष्ठ परन्तप”। कस्य वचनमिदम्?

(अर्जुनस्य, कर्णस्य, कृष्णस्य)

**Hint:**

उत्तरसूचिकानि।

1.महाभारतात् 2.व्यासः 3.अर्जुनः 4.कृष्णस्य।